Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2024 GISRRJ | Volume 7 | Issue 6 | ISSN : 2582-0095

# भारतीयज्ञानपरम्परायाः बोधसाधनानि

डॉ. अर्चना कुमारी
सहायकाचार्या,संस्कृत-विभागः, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालयः, धर्मशाला,काङ्गड़ा (हि.प्र.)

**Article Info**
Volume 7, Issue 6
**Page Number :** 85-93

**Publication Issue :**
November-December-2024

**Article History**
Accepted : 10 Dec 2024
Published : 20 Dec 2024

**शोधसारांशः-** भारतीयज्ञानपरम्परायाः मूलस्रोतांसि वेदाः एव सन्ति । एतस्याः भारतीयज्ञानपरम्परायाः ज्ञानमयशब्दराशेः बोधाय बहूनि साधनानि सन्ति तेषु प्रमुखानि विवेचितानि । तत्र भारतीयज्ञानपरम्परायाः साधनभूतग्रन्थानामवगमनार्थं तेषु निश्चितार्थस्य ज्ञानार्थञ्च साधनं संस्कृतभाषा । अस्माकं बुद्धिः निश्चयात्मिका तर्कयुक्ता च भवेद् येन सिद्धान्तनिश्चयः ऋषिवदेवास्माकमपि स्यात् तदर्थं साधनं तर्कशास्त्रम् । व्यक्तित्वज्ञाने याः जीवन्तपरम्पराः सन्ति तथा समाजे मानकरूपेण ये गुणाः सन्ति तान् प्राप्तुं साधनं धर्मशास्त्रम् । भारतीयज्ञानपरम्परायाः कीर्तिस्तम्भरूपेण साधनं शिल्पशास्त्रम् । यदा एतैः साधनैरपि बोधः न भवति तदा साधनं शब्दप्रामाण्यमेव शरणम् । एतेषां साधनानां सारल्येनावबोधाय साधनं गुरु-शिष्यपरम्परेति । यज्ज्ञानं तर्कानुमाननियमैश्च प्राप्तुमशक्यं तदर्थम् अन्तिमं साधनं समाधिजं प्रत्यक्षम् ।

**कूटशब्दाः -** ज्ञानम्, भारतीयज्ञानपरम्परा, बोधः, स्मृतयः, ऋषिः, अनादिरूपता, प्रमाणशास्त्राणि, संस्कृतभाषा, लोककल्याणम्, वैचारिकसहिष्णुता, तर्कशास्त्रम्, पञ्चावयवः, वस्तुपरीक्षणम्, यथार्थरूपम्, गणितशास्त्रम्, जीवनम्, धर्मः, शान्तिः, संस्काराः, प्रत्यक्षीकरणम्, समाधिः, योगः, विवेकज्ञानम्, शब्दप्रामाण्यम् ।

**प्रस्तावना** - ज्ञानं हि नाम भवति सर्वेषां प्रियं वस्तु । न हि कश्चिदपि एतद् कालावधौ उपलब्धः यः अहम् अज्ञः स्याम् इति वाञ्छेत् । इदञ्च ज्ञानम् आत्मैव । आत्मा सर्वातिशयेन प्रियं भवत्येव । तदेव ज्ञानस्य आत्मरूपता दर्शनेष्वपि अभिमता । श्रुतिश्चाह -**सत्यं ज्ञानमनन्तं ब्रह्मेति**[1] । तच्च ज्ञानं क्वचिद् व्यवहारभूतमपि सर्वविषयाणां विषयित्वमपि प्रसिद्धमस्य । तदेवोच्यते **ज्ञानं बुद्धिरिति**[2] । अतः बुद्धिरूपिणि ज्ञाने व्यवहारविषयता आत्मरूपिणि ज्ञाने च आनन्दविषयता । उक्तञ्च श्रुतौ -

**रसं हि एवायं लब्ध्वाऽऽनन्दी भवतीति**[3] । उभयविधस्यापि ज्ञानस्य प्रयोजकत्वं वेदानाम् । वेदाश्च अनन्ताः तदाधारेणैव स्मृतयः प्रकल्पिताः । आह च भर्तृहरिः -

**"स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः ।**
**तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः"।।**[4]

तत्र उपनिबद्धं ज्ञानम् अनादिभूतम् अजस्रम् अबाधितञ्च ज्योतिःस्वरूपमिति निर्बाधमभिमन्यते सर्वैः । एतस्य च ज्ञाननिधेः साक्षाद् द्रष्टारः अस्माकम् ऋषयः आसन् । ध्वनितश्चायं निरुक्तकारेण -**साक्षात्कृतधर्माण ऋषयो बभूवुः**[5] । अत एव **ऋषिर्दर्शनाद्**[6] इत्युच्यते ।ज्ञानस्यास्य अनादिरूपतां पुनश्च समर्पितवान् भर्तृहरिः -

**अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम् ।**
**शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः ।।**[7]



**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**भारतीयज्ञानपरम्परायाः तात्पर्यम्–** अनादिकालतोऽस्माभि अविच्छिन्नं प्रवहद्**यज्ज्ञानं**[8]तदेव **परम्परया**[9]इदानीमपि तथैवाधिगतं भवति। विशेषतः भारतीयं ज्ञानम् अबाधितं सत् सर्वमपि मनुष्यजातम् उपकरोति उपस्करोति च । तदेव इयं ज्ञानधारा भारतीयज्ञानपरम्परा इत्यभिधानेन आद्रियते । प्रमाणञ्चात्र गीताशास्त्रम् –

**इमं विवस्वते योगं प्रोक्तवानहमव्ययम् । विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ।।**[10]

**एवं परम्पराप्राप्तमिमं राजर्षयो विदुः । स कालेनेह महता योगोनष्टः परन्तपः ।।**[11]

भारतीयज्ञानपरम्परायां वेदनिहितानि शास्त्राणि द्विविधानि सन्ति । प्रथमविधशास्त्राणि प्रमाणशास्त्राणि । तत्र प्रमाणैः पुष्टः सिद्धान्तः उक्तः अस्ति । यथा आयुर्वेदः अस्ति तत्र विविधप्रमाणैः सिद्धान्ताः उक्ताः सन्ति । एवमेव न्यायशास्त्राणि, ज्योतिषशास्त्राणि, गणितशास्त्राणि, शिल्पशास्त्राणि, पाकशास्त्राणि इत्यादीनि ।द्वितीयविधानि शास्त्राणि सन्ति उपदेशशास्त्राणि । यथा धर्मशास्त्रमस्ति तत्र आचरणविषये अधिकमुक्तम्, प्रमाणविषये न्यूनम् । एवमेव योगशास्त्रं, समृतिशास्त्राणि, गृह्यसूत्राणि । सिद्धान्तग्रन्थेषु ऋषिभिः ये सिद्धान्ताः उक्ताःतथा उपदेशशास्त्रेषु तैः यद् उपदिष्टं तत्र सिद्धान्तनिश्चयनिमित्तं यत्किमपि ते कृतवन्तः तत्सर्वमस्ति भारतीयज्ञानपरम्परा ।

वर्तमानेऽपि ज्ञानप्राप्त्यर्थं साधनरूपेण एतस्याः परम्परायाः आवश्यकता वर्तते । तच्च गहनं प्रकीर्णञ्च अद्यत्वे तु सुकुमार बुद्धीनां परिश्रान्तबुद्धीनाञ्च अञ्जसा अर्थबोधनाय अवश्यमेव उपायविशेषः अभ्युपेयः। स एव मया अनुष्ठीयते ।अत्र भारतीयज्ञानपरम्परायाःबोधसाधनानि अधः प्रतिपादितानि सन्ति ।

**प्रथमं साधनं - संस्कृतभाषा** – अस्माकं पार्श्वे भारतीयज्ञानपरम्परायाः साधनरूपेण सर्वप्रथममस्ति संस्कृतभाषा ।भारतीयज्ञानपरम्परासम्बद्धाः लोकोपयोगिनश्च ये केऽपि ग्रन्थाः सन्ति तान् मनीषिणः संस्कृतभाषया एव प्राणैषुः । यथोक्तमपि – **सर्वासामपि भाषाणां जनानां जीवनं यतः ।**

**भासते संस्कृतं तेन शरीरस्य यथासवः ।।**

**यस्यां मुनीनां विदितं निबद्धं, यस्यां च बद्धं गदितं मुनीनाम् ।**

**ज्ञानञ्च विज्ञानमयं विशेषात् सा संस्कृता वाग्भुवि पूजितास्ति ।।**[12]

सर्वाणि शास्त्राणि ज्ञातुं संस्कृतभाषाया उपयोगिता अस्ति, यतोह्यत्र निश्चितार्थाः सन्ति । तथा एतेषु शास्त्रेषु यत्किमपि यया भाषया लिखितमस्ति तस्य तया भाषया एव पूर्णतया अवगमनं भवति तावता प्रमाणेन अनुवादेनन भवति । अतः संस्कृतभाषा आवश्यकी । एतदतिरिक्तं संस्कृतभाषायाम् अन्यभाषापेक्षया विचलनं न्यूनमस्ति ।यथा हिन्दीभाषायां दृश्यते भारतेन्दुहरिश्चन्द्रस्य काले हिन्दी–भाषायथा आसीद् इदानीं तथा नास्ति, तत्र परिवर्तनं जायमानमस्ति । तदपेक्षया संस्कृतभाषायां यथापञ्चतन्त्रस्य पुराअर्थबोधः भवति स्म तदवदेव अद्यापि संस्कृतभाषा तथैव लिख्यते पठ्यते च । यतोह्यत्र व्यवस्थितं व्याकरणादिकं वर्तते । संस्कृतभाषा **दिव्या सुबोधा सरला सरसा गीर्वाणवाणी जगति प्रसिद्धा च अस्ति ।**[13] तथा च संस्कृतं भारतस्य सभ्यतायाः संस्कृतेर्मूलञ्च परिभाषयति । सामाजिकता सौहार्दता सौख्यञ्च संस्कृतभाषया प्रतिपादितं भवति । संस्कृतेन जनाः उत्कर्षविचारापन्नाः जायन्ते । यथोक्तञ्च डॉ.कपिलवर्येण –

**संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः ।**

**वेदतत्त्वार्थसंजुष्टं लोकाऽऽलोककरं शिवम् ।।** [14]

वर्तमानेऽपि ज्ञानपरम्परायाः प्राप्त्यर्थं बहुभिर्प्रयासःकृतः यथा – रवीन्द्रनाथटैगोरगांधीप्रभृतयः परञ्च तेप्रथमं मार्गमेव व्यक्तवन्तः। तस्मात् ते मूलं न प्राप्तवन्तः । वैदेशिकीं भाषां पठित्वा एव ते प्रयासं कृतवन्तः । अद्यत्वेपि बहवः जनाः युक्ताः सन्ति परञ्च ते मार्गं न जानन्ति । अद्यत्वे वयं विद्यालयेषु यत्पठामः तत्र अस्माकं परम्परायाः अभावः दृश्यते । संस्कृतेन यासां प्रवृत्तीनां पोषणं भवति ताः प्रवृत्तयः पूर्वाग्रहं विना लोककल्याणं वर्धयन्ति । तद्यथा –

**समानी व आकूतिः समाना हृदयानि वः ।**

**समानमस्तु वो मनो यथा वः सुसहासति ।।**[15]

यतोहियत्किमपि वयं वदामः तेन न केवलमस्माकं चिन्तनं दृश्यते अपितु अस्माकं चिन्तने प्रभावः अपि जायते । संस्कृतेन जीवने सकारात्मकतायाः संचारः भवति । समाजे वैचारिकसहिष्णुतायाः अभावः दृश्यते परञ्च संस्कृतं वैचारिकविविधतायाः स्वागतं कुर्वती विश्वस्मै सामञ्जस्यस्य मन्त्रं यच्छति –

**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ।**

**मित्रस्य चक्षुषा समीक्षामहे ।।**[16]

अतः शिक्षायाः मुख्यधारा संस्कृतेन युक्ता भवेत् । तेन सर्वेऽपि भारतीयज्ञानपरम्परां ज्ञास्यन्ति ।

**द्वितीयं साधनं- तर्कशास्त्रम्–** भारतीयज्ञानपरम्परायाः यथार्थस्वरूपस्य बोधः तर्कशास्त्रेण अर्थाद्न्यायमीमांसागणितशास्त्रेभ्यः भवति ।गणितशास्त्रं न्यायाद् भिन्नमस्ति परञ्च तर्काधारितं वर्तते ।एतेषु शास्त्रेषु प्रतिपादिताः विषयाः न केवलं प्रामाण्याधारिताः प्रत्युत विवेकपूर्णतर्काधारिताः सन्ति । अत्र नीयते प्राप्यते विवक्षितार्थः सिद्धिरनेन इति न्यायः कथ्यतेअर्थाद् येन साधनेन ज्ञेयतत्त्वं प्राप्यते तत् साधनमेव न्यायः।भाष्यकारेणवात्स्यायनेन विवक्षितार्थस्य सिद्धिः पञ्चावयववाक्यैः उक्ता ।तथा चोक्तम् –**साधनीयस्यार्थं यावति शब्दसमूहे सिद्धिः सः परिसमाप्यते पञ्चावयवोपेतवाक्यात्मको न्यायः ।**[17]यथा प्रतिज्ञा–हेतु–दृष्टान्त–उपनयन–निगमनानि पञ्चावयवाः । एतैः पञ्चसाधनैः सिद्धिर्भवति । अस्मिन् शास्त्रे प्रमाणानां माहात्म्यम् अतिशयेन वर्तते । प्रमाणेन सत्यत्वासत्यत्वयोः परीक्षणं भवति । भाष्यकारोपि स्पष्टयति – **प्रमाणैर्वस्तुपरीक्षणं न्यायः**[18] ।तन्निमित्तं न्यायसूत्रे षोडशपदार्थानां नामकरणं, परिभाषा, परीक्षणञ्च प्रतिपादितम् । ते च पदार्थाः सन्ति –

**प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानामत्तत्वज्ञानाद् निःश्रेयसाधिगमः**[19]इति ।

एवमेव तर्कसम्बद्धमेव मीमांसाशास्त्रमपि वर्तते ।तर्केण अर्थाद् मीमांसाशास्त्रेणैव वेदवाक्यानां शब्दार्थयोः बोधः भवति । तद्यथा –

**वेदशास्त्राविरोधो च तर्कश्चक्षुरपश्यताम् ।**

**रूपमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते** [20]**।।**

मनुनापि समर्थितम्–

**आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।**

**यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः**[21] **।।**

मीमांसा शब्दस्य अर्थः अस्ति **गहनविचारः, परीक्षणम्, अनुसन्धानञ्च** [22] **।** शास्त्रमिदं भागद्वये विभक्तम् । जैमिनीप्रवर्तितपूर्वमीमांसायां मुख्यतया वेदनिहितकर्मकाण्डपरकमन्त्राणां तार्किका व्याख्या तथा वादरायणनाम्ना विख्यातायाम् उत्तरमीमांसायां ब्रह्मणः वास्तविक्याः स्थितेः विचारः कृतः ।विशेषतया अत्र शास्त्रे मन्त्रस्य देवतायाः, हवेः द्रव्यस्य, कस्यचिद् अन्यवस्तुनः विनियोगः कुत्र भवितव्यः षड् प्रमाणानि उक्तानि । तानि च –**श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षाद्**[23]इति ।

अतः भारतीयज्ञानपरम्परां ज्ञातुं न्यायमीमांसयोःद्वयोः परमोपादेयता । आभ्यां शास्त्राभ्याम्यज्ज्ञानं तद् यथार्थरूपेण प्राप्तुं शक्यते तथा ज्ञानमयशब्दराशेः विवेचनार्थम्इमे शास्त्रे। भारतीयदर्शनानां प्रवेशद्वारम् एते एव।

तदनन्तरमस्ति गणितशास्त्रम् । कौटिल्यानुसारं बाल्यावस्थायामेव शिक्षायाः आरम्भः चूडाकरणसंस्कारान्तर्गतम् अक्षरज्ञान–अंकगणनाभ्यां भवितव्यः । यथोक्तम् –**वृत्तचौलकर्मा लिपिं सङ्ख्यानं चोपयुञ्जीत**[24] । बाल्यकालादेव जनाः एतान् शास्त्रान् अधीतवन्तः । तस्मादेव अस्माभिः एषा परम्परा प्राप्ता । एवमद्यापि गणितशास्त्रम् अवगन्तुं शुल्बसूत्रस्य अध्ययनम् आवश्यकम्। अत्र शुल्बसूत्रं गणितस्य अस्ति परञ्च तत् पाठनाय नासीत् तत्र तु ऋषयः स्वस्य कृते नियमान् स्थापितवन्तः अनन्तरं तद् गत्वा अंकगणित–रेखागणित–बीजगणितरूपेण अस्माकं समक्षमागतम् । एतेषु त्रिषु क्षेत्रेषु विविधाचार्यैः परिश्रमं कृत्वा एषा परम्परा रक्षिता पोषिता च ।

एवं तर्कशास्त्राणां ज्ञानेन बुद्धिप्रखरता वर्धते तथा मोक्षस्य प्राप्तिर्भवति । तस्मात् प्रमाणपर्यन्तं गन्तुं शक्यते ।

**तृतीयं साधनं–धर्मशास्त्रम् –** अस्माकम् ऋषयः कथं स्वकीयं जीवनम् अजीवन्? ज्ञानमयशब्दराशेः विवेचनां न कुर्मः तर्हि तद्ज्ञातुमपि न शक्नुमः । अस्माकं याः परम्पराः आगताः तथा अस्माकं व्यक्तित्वज्ञाने याः सन्ति ताः जीवन्त परम्पराः सन्ति । ज्ञानस्य विधयः अर्थाद् जीवन्त परम्परा । जीवनं कथं जीवनीयम् ? तन्निमित्तं धर्मशास्त्रे नियमाः आसन् । ऋषीणां जीवनं दृष्ट्वा एतद् वयं ज्ञातुं शक्नुमः । एतन्निमित्तं धर्मसूत्राणि

अध्येतव्यानि। एतेषु धर्मस्य शाश्वतस्वरूपस्य वर्णनमसस्ति। एतेषु तानि तत्त्वानि संगृहीतानि सन्ति यैः विश्वे शान्तिः सद्भावः समुन्नतिः सुरक्षा च भवेत्। यैः गुणैः समाजे स्थिरता आगच्छेत् ते सर्वेऽपि गुणाः सत्य–अहिंसा–परोपकार– सहिष्णुता–उद्योगादयः धर्मस्य मूलभूततत्त्वानि। यथोक्तमपि –

**धारणाद् धर्म इत्याहुः धर्मो धारयते प्रजाः।**

**यः स्याद् धारण-संयुक्तः स धर्म इति निश्चयः।।**[25]

धर्मसूत्राणि आधारीकृत्य विविधाः स्मृतयः प्रणीताः। तत्रापि जीवने किं धार्यम्, कथम् आचरणीयम्,केन सार्धं कीदृशः व्यवहारः करणीयः, न्यायादयः विषयाः स्पष्टतया उक्ताः।एवमेव यज्ञ–यागादीनां विस्तृतं बोधार्थं श्रौतसूत्रस्य,षोडशसंस्काराणां, पाकयज्ञ–गृहनिर्माण–गृहप्रवेश–पशुपालन–कृषिकर्मादीनाञ्च विधीन् ज्ञातुं गृह्यसूत्रस्य,च अध्ययनम् आवश्यकम्।

अपि च **यतोऽभ्युदय-निःश्रेयस-सिद्धिः स धर्मः**[26] **।** एवंमन्त्र–ब्राह्मण–कल्पसूत्र–इतिहास–पुराण–वेदाङ्गान्यपि धर्मः एव। प्रमाणञ्चात्र –

**अपि च श्रेयः साधनं धर्मः तत्र मन्त्रोऽप्यन्तर्गत इति मन्त्रभागः साक्षात्कृतो धर्मतयैव, ब्राह्मणभागोऽपि यद्ब्राह्मणानि इति ब्रह्मयज्ञशेषतया विनिर्युक्तत्वाद्धर्म एवेति तस्यापि धर्मतयैव साक्षात्करणम्। कल्पसूत्रयोरितिहासपुराणयोश्च ब्रह्मयज्ञशेषता**[27] **।**

एवमेव वेदनिहितज्ञानराशिं ज्ञातुं पतञ्जलिना कर्तव्यत्वेनोक्तम् – **ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोध्येयो ज्ञेयश्च**[28] । तस्माद् अङ्गानामप्यस्ति धर्मशेषता।अतः ज्ञानपरम्परायां ऋग्यजुसामाथर्वाख्यानां वेदमन्त्राणां अङ्गत्वेन सम्यक् उच्चारणाय तात्पर्यादिबोधाय च षट्शास्त्राणि प्रथितानि। पाणिनीयशिक्षायां एतानि वेदपुरुषस्य अङ्गरूपेण वर्णितानि। तद्यथा – **“छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते”**[29] **।।**

इत्थं धर्मरूपेणैव ऋषयः एतेषां साक्षात्कारं कृतवन्तः। तथा च –

**विद्यां चाविद्यां च यस्तद् वेदोभयं सह।**

**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।** [30]

इति ज्ञानकर्मणोः तत्त्वम् अस्माकम् ऋषयः सम्यक् ज्ञातवन्तः। यदा पाश्चात्यसभ्यतायाः गर्वान्विताः जातयः वनेषु भ्रमित्वा संकेतमात्रेण स्वमनोगतभावान् प्रकटयन्तः आसन् तदा ते सरस्वत्याः तीरे देववाण्याः रहस्ययुक्तानां ऋचाम् उच्चारणं सरसां साम्नाञ्च गायनं कुर्वन्तः आसन्। एवं जगत्यस्मिन् घनान्धकारे ज्ञानसूर्यः भारतवर्षे एव अदीव्यत्। तस्मादेव उक्तम् यद् अस्य देशस्य अग्रजन्मभ्यः ब्रह्मणेभ्यः पृथिवीतलस्य सर्वमानवैः स्वं स्वं चरित्रं शिक्षणीयम्। भणितञ्चैतद् मनुना –

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**

**स्वं- स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।**[31]

**चतुर्थंसाधनं - शिल्पशास्त्रम्–** अद्य निर्विवादरूपेण अस्माकं समक्षं शिल्पशास्त्रमेवास्ति। अस्माकं ज्ञानपरम्परायाः शिल्पशास्त्रं कीर्तिस्तम्भः अस्ति। भारतीयज्ञानपरम्परायाम्एतत् शास्त्रं कलाशिल्पयोः विस्तृतश्रृंखलार्थम् अभिकल्पनियमानां, सिद्धान्तानाञ्च वर्णनं करोति। अत्र वास्तुकला–मूर्तीकला–चित्रकला–संगीत–नृत्याभिनय–चिकित्सादीनां विविधक्षेत्राणां समन्वयः भवति। मुख्यतया अत्र वास्तुकला–मूर्तीकला–चित्रकलादीनां विज्ञानं मानसार–ब्राह्मीय–मनुसार–शिल्परत्नादिषु ग्रन्थेषु पूर्णतया वर्णितमस्ति। संगीत–नृत्याभिनय–दृश्यकलादीनाञ्च विशदं विवेचनं विष्णुधर्मोत्तरपुराणे चित्रलक्षणे च व्यापकत्वेन प्रतिपादितम्। तथा चित्रकला–विभिन्नवर्णानांमिश्रणं–छायाचित्रस्वीकरणस्य च विवरणं सहस्रवर्षाणि पूर्वं चित्रकर्मशास्त्रे भीमऋषिणा वर्णितम्। ज्योतिष–खगोलविज्ञानं, भूगोलविज्ञानं, भविष्यकथनं, वास्तुकला तथा निर्माणसिद्धान्ताः, कृषि–वनस्पति–रत्न–प्राणिविज्ञानादिविषयाः बृहत्संहितायां सम्यक् प्रथिताः। चिकित्साविषयकं ज्ञानं चरकसंहिता–सुश्रुतसंहिताष्टाङ्गहृदयादिषु गन्थेषु उपलब्धम्। शिल्पशास्त्रस्य अनेकानि उदाहरणानि प्रमाणरूपेण अस्माकं समक्षं वर्तन्ते यानि दृष्ट्वा वयंगौरवम् अनुभवामः। यथा

कोर्णाकसूर्यमन्दिरम्, तंजौरस्य बृहदेश्वरमन्दिरम्, मुरुदेश्वरमन्दिरं कर्नाटके, द्वारकाधीशमन्दिरं गुजराते, पापनाशिनीशिवमन्दिरम् ओडिसायाम्इत्यादीनि । एतेषां वैशिष्ट्यम् अन्धः अपि स्पर्शं कृत्वा ज्ञातुं शक्नोति।

**पञ्चमंसाधनं – शब्दप्रामाण्यम् –** यस्य ज्ञानस्य तर्केण, अनुमानेन, नियमेन च बोधः न भवति तस्य बोधः शब्दप्रामाण्येन भवति । यतोहि जगतः सर्वेऽपि व्यवहाराः वाङ्गिनबद्धाः वर्तन्ते। अनुमेयमपि ज्ञानं वाचैव बोध्यते। प्रत्यक्षस्यापि ज्ञानस्य परस्मै समाख्यानं वाचैव। अतः सर्वं ज्ञानं शब्दानुविद्धम् इति प्रतिष्ठापितं हरिणा। उक्तञ्च तेन –

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते**[32]**।।**

इति वाक्यं प्रमाणं यच्छास्त्रं सर्वत्र निर्बाधं सत् चैतन्यमिव परिस्फुरति । आगमश्चायं श्रुतिलक्षणः । तेन कुत्राप्यस्य नाप्रामाण्यावसरः, अपितु **स्वतः प्रामाण्याद्**[33] अबाधितपथस्य प्रवर्तकत्वमप्यस्योपकल्पते । तेन आगमपथमनुवर्तमानः जनः असद्धिया तार्किकवादैः सत्पथाद् न विचाल्यते । अर्थाद् यथा अहमस्मि न वा इति सन्दिग्धे अहमेव इति प्रमाणं सर्वथा अबाधितं वर्तते तथैव आगमोऽपि चैतन्यमिव सर्वथा अविकलमेव । प्रमाणञ्चात्र भर्तृहरिः –

**चैतन्यमिव यश्चायमविच्छेदेन वर्तते ।**

**आगमस्तमुपासीनो हेतुवादैर्न बाध्यते**[34] **।।**

अत्र जिज्ञासते कोऽयम् आगमः ? इत्युक्ते वेदानामेव आगमत्वं व्यवहारेषूपलभ्यते ।

तथा च –**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।**

**एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता**[35] **।।**

इत्याद्यभियुक्तोक्तिभिः सर्वोत्कृष्टप्रामाण्यं दधतः परब्रह्मणः परमात्मनो **निःश्वासभूताः वेदाः**[36]कल्पतरुत्वेन आमन्यन्ते मनीषिभिः, यतस्तानेव आधारीकृत्य श्रीशङ्कररामानुजाचार्यादिभिः पन्थानः सिद्धान्ताश्च प्रतिष्ठापिताः ।

**योयादृशं कामयते तदर्थं तद्रूपेणैव विपरिणामशालित्वात्**

**तदीप्सितार्थप्रदायकत्वाच्च वेदानां कल्पतरुत्वं सिद्ध्यति**[37] **।**

**षष्ठं साधनं - गुरु-शिष्यपरम्परा** –

एवं यः तत्त्वज्ञानं प्राप्तुमिच्छति सः श्रद्धया विनम्रभावेन भक्त्या च महापुरूषाणां समीपं गत्वा आत्मसमर्पणं कुर्यात् तदा प्रश्नकरणे तेषाम् उपदेशेन ज्ञानप्राप्तिर्भवति । तद्यथा –

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।**

**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः ।।**[38]

अत्र प्रणिपातेन इत्युक्तम् – अस्याशयः वर्तते अस्माकं मानसिकी सिद्धता । आत्मानं निम्नस्तरे स्थापनम् । यतोहि उत्तुङ्गशिखरेषु जलं न तिष्ठति निम्नस्थानेषु एव तिष्ठति । उपनिषदः अपि समर्थयन्ति –

**तद्विज्ञानार्थं गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठ।**[39]

तदनन्तरं ज्ञानप्राप्तौ तपसः ब्रह्मचर्यस्य श्रद्धायाः विद्यायाः च महत्त्वं वर्तते । एभि आत्मनः अन्वेषणेन एव जीवनस्य साफल्यं जायते । यदि कोऽपि मनसा भावेन वा आत्मानः अन्वेषणं करोति सः सिद्धिं प्राप्नोति । उक्तमप्यस्ति –

**तपसा ब्रह्मचर्येण श्रद्धया विद्यया आत्मानं अन्विष्यात् ।**[40]

**सप्तमंसाधनं -समाधिजं प्रत्यक्षम् –** यद् ज्ञानं तर्केण अध्ययनेन नियमेन च न प्राप्तुं शक्यते तथा यत्सर्वं मनसि एव तस्य ज्ञानं कथं भवेत्? तन्निमित्तम् ऋषयः किं कृतवन्तः ? तस्यज्ञानस्य प्रत्यक्षीकरणं कथं भवेत्? तेषाम् एतद् सर्वं ज्ञानं योगजप्रत्यक्षेण आसीत् ।तदर्थमत्र सप्तमं साधनमुच्यते समाधिजं प्रत्यक्षम् अथवा योगजप्रत्यक्षम्। योगस्यसाआनंदमयी अवस्था समाधिः उच्यते यस्यां मनुष्यः परमानंदम् अनुभवति । तथा शाश्वतसत्याद् न कदापि विचलति । यथोक्तं गीतायाम् –

**सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्।**

**वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः॥**[41]

तन्निमित्तम् आगमपूर्विका अभ्यासजन्यप्रतिभा अपेक्षिता । यथोक्तम् -

**परेषामसमाख्येयमभ्यासादेव जायते ।**

**मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम्** [42]**॥**

एवमुत्पन्नस्य ज्ञानस्यानुमानेन बाधः न भवति । उक्तञ्च हरिणा-

**अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।**

**ये भावान् वचनं तेषां नानुमानेन बाध्यते** [43]**॥**

एवम्अभ्यासजन्यप्रतिभया योगेन च विवेकज्ञानम् उत्पन्नं भवति । विवेकज्ञानाद् जीवनस्य अन्तिमं लक्ष्यम् अर्थात् कैवल्यं यावद् योगी गच्छति ।ज्ञानमाध्यमेन लौकिकं पारलौकिकञ्च प्रत्यक्षं करोति । आचार्यः पतञ्जलिः प्रतिपादयति -

**क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ॥**

**जातिलक्षणदेशैरन्यतानवच्छेदात् तुल्ययोस्ततः प्रतिपत्तिः ॥**

**तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम् ॥**

**सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति ॥**[44]

ऋषीणां दृष्टौएषः क्रमः सर्वादौ आगच्छति।परञ्च आधुनिकसमये एषः क्रमः सर्वान्तेभवति ॥

**निष्कर्षः**- एवं भारतीयज्ञानपरम्परायाः बोधसाधनानि विविधानि सन्ति । एतानि न केवलं शास्त्रेषु ग्रन्थेष्वैव उपलभ्यन्ते प्रत्युत जीवनस्य विभिन्नासु अवस्थास्वपि प्राप्यन्ते । एतैः साधनैः भारतीयज्ञानपरम्परायाः मूल्यानां,सिद्धान्तानां,ज्ञानस्य च बोधः आत्मसाच्च भवितुमर्हतीति शम् ॥

सन्दर्भग्रन्थसूची -


1. ईशावास्योपनिषद्। ईशादि नौ उपनिषद् । व्याख्याकारः, हरिकृष्णदास गोयन्का । गीताप्रेसगोरखपुरम्, सं 2038 नवमं संस्करणम्।
2. तर्कसंग्रहः ।भट्टः अन्नम्। तर्कसंग्रहदीपिका- न्यायवोधिनी- पदकृत्य, श्रीनिवास मुखोल्लासिनी संस्कृतहिन्दीव्याख्यासंवलित। गोविन्दाचार्यः, सम्पादकः । चौखम्बासुरभारती प्रकाशनं वाराणसी, 2017।
3. निरुक्त पञ्चाध्यायी। यास्कः । प.छज्जूरामशास्त्री विद्यासागरः, व्याख्याकारः । मेहरचन्द लछमनदास पब्लिकेशन्स नई दिल्ली । संस्करणम् 13-। 2008 ।
4. अष्टाध्यायी। पाणिनिः। ईश्वरचन्द्रः, पण्डितः । चन्द्रलेखाव्याख्योपेता । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2017।
5. मनुस्मृतिः । मनुः । भट्टः कुल्लूकः । मन्वर्थमुक्तावलीटीकासहितम्, मणिप्रभा हिन्दीव्याख्योपेता । शास्त्री हरगोविन्दः ।चौखम्बा संस्कृत सीरीज ऑफिस वाराणसी । प्रथम, वि. सं. 2080, सन् 2023 ।
6. वाक्यपदीयम्, ब्रह्मकाण्डम् ।भर्तृहरिः ।डॉशिवशंकर अवस्थी ., व्याख्याकारः ।चौखम्बा विद्याभवन, वाराणसी, 2016 ।
7. धातु-पाठ, पाणिनिः । रामलाल कपूर ट्रस्ट प्रकाशन, पाणिनीय रेवली, सोनीपत, हरियाणा,2000 ई0 ।
8. अमरकोषः, व्याख्याकारः डॉ. ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2000 ।
9. वायुपुराणम्,गीताप्रेस गोरखपुर, - 273005, गोविन्दभवन कार्यालय, कोलकत्ता संस्थान ।
10. श्रीमद्भगवद्गीता । गीताप्रेस गोरखपुर, - 273005 । गोविन्दभवन कार्यालय, कोलकत्ता संस्थान । सं. 2075 अस्सीवाँ पुनर्मुद्रणम् ।
11. पातञ्जलयोगप्रदीपः, मोतीलाल बनारसीदास, 41 यू. ए. बंगलो रोड़, जवाहर नगर दिल्ली 110 007 ।
12. व्याकरणमहाभाष्यम् । पतञ्जलिः। भट्टः नागेशः, कैयटः, भाष्यप्रदीपोद्द्योतसमुल्लसितम् । जोशी भार्गवशास्त्री, संशोधकः । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2018 ।
13. पाणिनीयशिक्षा,पाणिनिः ।चौखम्बा सुरभारती प्रकाशन, वाराणसी
14. वैयाकरणसिद्धान्तकौमुदी ।दीक्षितः, भट्टोजिः । पाण्डेयः गोपालदत्तः, व्याख्याकारः । चौखम्बासुरभारती प्रकाशनं वाराणसी, 2017 ।

15. मुण्डकोपनिषद्,ईशादि नौ उपनिषद् ।व्याख्याकार:, हरिकृष्णदास गोयन्दा । गीताप्रेसगोरखपुरम्, सं 2038 नवमं संस्करणम् ।
16. बृहद्संस्कृतनिबन्धकलिकाशिवदत्त द्विवेदी .आचार्य पं „ भारतीय विद्याप्रकाशन दिल्ली वाराणसी । -
17. न्यायवैशेषिक, लेखक: एस. के. सिंह, रेखा प्रकाशन 3917, नई सड़क दिल्ली -6 ।
18. भविष्यपुराणम्,जयदयाल गोयन्दा, गीताप्रेस गोरखपुर- 273005, गोविन्दभवन कार्यालय, कोलकत्ता संस्थान ।
19. महाभारतम्, अनुवादक पण्डित रामनारायण शास्त्री पाण्डेय, गीताप्रेस गोरखपुर - 273005, सं. 2075 सोलहवाँ पुनर्मुद्रण, गोविन्दभवन कार्यालय, कोलकत्ता संस्थान ।
20. संस्कृतनिबन्धशतकम्, डॉ. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी ।
21. प्रश्नोपनिषद् । ईशादि नौ उपनिषद् ।व्याख्याकार:, हरिकृष्णदास गोयन्दा । गीताप्रेसगोरखपुरम्, सं 2038 नवमं संस्करणम् ।
22. पातञ्जल योगदर्शन ।पतञ्जलि:। व्याख्याकार: स्वामी हरिहरानन्द आरण्य । मोतीलाल बनारसीदास । नवमपुनर्मुद्रणं दिल्ली, 2017 ।
23. तर्कभाषा । श्रीकेशवमिश्र: । सम्पादक: डॉ. श्री निवास शास्त्री । साहित्य भण्डार शिक्षा साहित्य के मुद्रक एवं प्रकाशक, सुभाष हाजार मेरठ ।
24. भारतीय दर्शन । मिश्र: जगदीशचन्द्र: । चौखम्बासुरभारती प्रकाशनं वाराणसी, प्रथमसंस्करणं2010 ।
25. संस्कृतशास्त्रों का इतिहास । उपाध्याय: बलदेव: आचार्य: । चौखम्बाविद्याभवन प्रकाशनं वाराणसी, 2006 ।
26. कौटलीयार्थशास्त्रम् । आचार्यविष्णुगुप्त: । जयमङ्गला नीतिनीर्णीत व्याख्या च । सम्पादक: श्रीविश्वनाथशास्त्रिदातार: । सम्पूर्णानन्दसंस्कृतविश्वविद्यालय: वाराणसी, 1991 ।
27. संस्कृत-हिन्दी कोश । वामन शिवराम आप्टे । मोतीलाल बनारसीदास दिल्ली । पुनर्मुद्रणं , 2001 ।
28. कणाद-गौतमीयम् । व्याख्याकार: आचार्य विश्वनाथ शास्त्री । भारतीय संस्कृत भवन जालन्धर । षष्ठं संस्करणम् - 1984 ।

---

1.तैत्तिरीयोपनिषद्, ब्रह्मानन्दवल्ली, प्रथम अनुवाक, पृ. सं. 305, ईशादि नौ उपनिषद् - गीताप्रेस गोरखपुर,

2. तर्कसंग्रह:, बुद्धिनिरूपणम्, पृ. सं 117 ।

3.तैत्तिरीयोपनिषद्, ब्रह्मानन्दवल्ली, षष्ठ अनुवाक, पृ. सं. 321, ईशादि नौ उपनिषद् - गीताप्रेस गोरखपुर,

4.वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका संख्या- 7 ।

5. निरुक्त पञ्चाध्ययी, प्रथमोऽध्याय:, षष्ठ: पाद:, पृष्ठ 57,पण्डितछज्जूराम शास्त्री-विद्यासागर, ।

6. ऋषी गतौ धातो:, सर्वधातुभ्य: इन् पा. सू. 4-1-17, इति औणादिक सूत्रेण इन् प्रत्यययोगात् निष्पन्नो ऋषिशब्द: यस्यार्थ: मन्त्रद्रष्टा ।

7.वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका संख्या- 135 ।

8.क. ज्ञानम् - अत्र ज्ञानमिति शब्दं पश्यामश्चेत् ज्ञा धातो: भावे अवगम: बोधश्च, कर्मणि बोधविषय:, करणे ल्युटि वा बोधसाधनम् इत्यर्थ: समागच्छति।

ख. मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयो: । वर्तमानकालिकं ज्ञानमेतदेवास्ति । अमरकोश: 1-5-6 ।।

ग.ज्ञानविषये गीतायामुक्तम् - अध्यात्मज्ञाननित्यत्वं तत्वज्ञानार्थ दर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोन्यथा ।। श्रीमद्भगवद्गीता - 13, 12 ।।

तज्ज्ञानं त्रिविधं - सात्विकं, राजसं, तामसम् ।

घ.सात्विकं ज्ञानम् "सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्" ।। श्रीमद्भगवद्गीता. अ. 18,श्लोक सं 20 ।।

ङ.राजसं ज्ञानम्"पृथकत्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् । वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्" ।। श्रीमद्भगवद्गीता. अ. 18,श्लोक सं. 21 ।।

च.तामसं ज्ञानम्"यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् । अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम्" ।। श्रीमद्भगवद्गीता. अ. 18,श्लोक सं. 22

तत्र सात्विकं ज्ञानमेव श्रेष्ठम् ।

छ.न्यायमते - अप्रमा च प्रमा चैव ज्ञानं द्विविधमुच्यते ।

ज.वायुपुराणे उत्तरभागे –वैराग्याज्जायते ज्ञानं ज्ञानयोग प्रवर्तते । योगजः पतितो वापि मुच्यते नात्र संशयः ।।

9.परम्परा अर्थात् परिपाटी अनुक्रमः । परम्परा शब्दस्तु अव्युत्पन्नं प्रतिपादिकं तथा च नित्यस्त्रीलिङ्गम् ।।

सि. कौ, तद्धितेषु पाञ्चनिक प्रकरणम् च परोवरपरम्परपुत्रपौमनुभवति अ. 5-1-10 इति सूत्र वृत्तिः ।

10 . श्रीमद्भगवद्गीता. अ. 4,श्लोक सं. 1 ।।

11.श्रीमद्भगवद्गीता. अ. 4,श्लोक सं. 2 ।।

12.बृहद्संस्कृतनिबन्धकलिका, आचार्य पं. शिवदत्त द्विवेदी. पृष्ठसंख्या 26 भारतीय विद्याप्रकाशन दिल्ली - वाराणसी ।

13.गीर्वणवाणी जगति प्रसिद्ध दिव्या सुबोधा सरलातिरम्या । महाकवीनामखिललोत्तमा सा सरस्वती भारतभूसुराणाम् ।।बृहद्संस्कृतनिबन्धकलिका, आचार्य पं. शिवदत्त द्विवेदी. पृष्ठसंख्या 26 भारतीय विद्याप्रकाशन दिल्ली - वाराणसी ।

14.निबन्धशतकम्, कपिलदेवद्विवेदी ।

15.ऋग्वेद 10.191.4 ।।

16. यजुर्वेद 36.18 ।।

17.वात्स्यायनभाष्यम्, न्यायसूत्रम् 1.1.1 ।।

18.वात्स्यायनभाष्यम्, न्यायसूत्रम् 1.1.1 ।।

19.तर्कभाषा, पृ. सं 3 ।न्यायसूत्रम् ।। 1.1.1

20.वाक्यपदीयम् –कारिका संख्या ,ब्रह्मकाण्डम् ,126 ।

21.मनुस्मृति 1-2 106 ।

22.संस्कृत-हिन्दी कोश । वामन शिवराम आप्टे । पृ. सं. 802 ।

23.जैमिनि सूत्र 3-3-14 ।

24.कौटलीयार्थशास्त्रम्, आदितः अध्याय 5 । पृ सं. 410 ।।

25. महाभारतम्, कर्णपर्व ।

26. कणाद-गौतमीयम् । पदार्थानुशासनम् पृ. सं - 3 ।

27.वाक्यपदीयम्ब्रह्मकाण्डम् , । कारिका संख्या –5 ।डॉ. शिवशंकर अवस्थीप्रणीता हिन्दीटीकाविवरणं, पृ. सं 83

28. व्याकरणमहाभाष्यम्, 1-1-1, शास्त्रप्रयोजनाधिकरणे, आगमपदार्थनिरूपणभाष्ये ।

29.पाणिनीयशिक्षा, श्लोकसंख्या 41,42 ।

30.ईशावास्योपनिषद्, मंत्रसंख्या 11, ईशादि नौ उपनिषद् - गीताप्रेस गोरखपुर,

31.मनुस्मृति 2-20 ।

32.वाक्यपदीयम्- कारिका ,शिवशंकर अवस्थी .डॉ ,ब्रह्मकाण्डम् ,141 पृष्ठः ,- 368 ।

33.निजशक्त्यभिव्यक्तेः स्वतः प्रामाण्यम् । सांख्यसूत्र 5.51 ।

तद्वचनादाम्नायस्य प्रामाण्यम् इति वैशेषिकदर्शने 1-1-3 ।
स्वतः प्रमाणं परतः प्रमाणं शुकाङ्गना यत्र गिरा गिरन्ति ।
शिष्योपशिष्यैरुपगीयमानमवेहि तन्मण्डनमिश्रधाम ।। भारतीय दर्शन । मिश्रः जगदीशचन्द्रः । दशम परिच्छेद । पृ. सं. 490 ।
34.वाक्यपदीयम्204- पृष्ठः ,40- कारिका ,शिवशंकर अवस्थी .डॉ ,ब्रह्मकाण्डम् ,
35.आचार्य सायणः, कृष्णयजुर्वेदः, तैत्तिरीयसंहिता (उपोद्घातः) ।
36.आचार्य सायणः, वेदभाष्यस्य मंगलाचरणे - यस्य ब्रह्मणः निःश्वसितं वेदाः । मनुस्मृतिः - निःश्वासभूताः वेदाः ।
37.इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकोपायं यः ग्रन्थः वेदयति सः वेदः । आचार्य सायणः, ऋग्वेदभाष्यभूमिका ।
38.श्रीमद्भगवद्गीता. अ. 4,श्लोक सं. 34 ।।
39.मुण्डकोपनिषद् 1.2.12, ईशादि नौ उपनिषद् - गीताप्रेस गोरखपुर, ।।
40.प्रश्नोपनिषद् 1.10, ईशादि नौ उपनिषद् - गीताप्रेस गोरखपुर ।
41. श्रीमद्भगवद्गीता. अ. 6,श्लोक सं. 21 ।।
42.वाक्यपदीयम्- कारिका ,शिवशंकर अवस्थी .डॉ ,ब्रह्मकाण्डम् ,35 पृष्ठः ,- 194 ।
43.वाक्यपदीयम्- कारिका ,शिवशंकर अवस्थी .डॉ ,ब्रह्मकाण्डम् ,38 पृष्ठः ,- 200 ।
44. पातञ्जलयोगदर्शन, विभूतिपादः, सूत्र संख्या 52, 53,54, 55 ।